


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2019; 5(1): 610-614
www.allresearchjournal.com
Received: 27-11-2018
Accepted: 29-12-2018

**डॉ० सूर्य मोहन कुमार**
पुस्तकालय सहाकय,
शिक्षाशास्त्र विभाग,
का०सिं०द०सं०वि०वि०,
दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० सूर्य मोहन कुमार**
पुस्तकालय सहाकय,
शिक्षाशास्त्र विभाग,
का०सिं०द०सं०वि०वि०,
दरभंगा, बिहार, भारत

# नैतिकतायाः शिक्षोपरिअस्याः प्रभावः

## डॉ० सूर्य मोहन कुमार

**सारांश**
नीति शब्दः प्रापणार्थे प्रयुज्यमानः 'णी' प्रापणे धातोः स्त्रियां क्तिन् प्रत्ययेन निष्पन्नः सन् सिद्धो भवति; अतः नीतिशब्दस्यार्थः प्रापणं सिद्धयति। किन्तु प्रापणमेका सकर्मक क्रिया विद्यते। अतः अस्य पूर्णतायै संक्षेपतः चतुर्णा वस्तूनामावश्यकता भवति कर्त्ता कर्मापादान क्रियाणामिति। सहैव प्रापण मध्येका क्रिया विद्यते। अतः अस्याः कियायाः द्वेकर्मणी विद्येते। सम्प्रेषणमिति। ततश्च तर्हि समीचीनमेव। एतावता कस्यापि जनस्यानयनं नीति पदार्थः। नयन क्रिया विद्यते सैव परमार्थतः नीति पदार्थः एवञ्च मार्गान्तरे कस्यापि जनस्य उच्यते। तदुक्तम्-

दमोदण्ड इति ख्यातस्तस्माद् दण्डो महीपतिः।
तस्यनीतिर्दण्डनीतिर्नयनात् नीतिरुच्यते॥ इति।

**कूटशब्दः** नीति शब्दः, नीति पदार्थः, शिक्षोपरिअस्या

## प्रस्तावना
अत्रेदमपि द्रष्टव्यमस्ति यदस्यानीतेः कर्त्ता कोऽस्ति। नीति विषयेषु परिष्काराय भीष्मस्य कथनं विद्यते यद् चातुर्वर्ण्यस्य धर्मादीनां विप्लवे सति राज्ञा एव तत् प्रतिरोधेऽधिकारोऽस्ति। तथाहि-

चातुर्वर्ण्यस्य धर्माश्च रक्षितव्या महीक्षिता।
धर्मसङ्कट रक्षा च राज्ञां धर्मः सनातनः॥

राजनीति प्रकाशे उद्धृतं मत्स्यपुराणीयं वचनमादाय कथनमिदं प्रमाणितं भवति। तथाहि-

स्वे स्वे धर्मे व्यवस्थानं वर्णानां पृथिवीपतेः।
परोधर्मः सदा प्रोक्तः तत्र यत्न परो भवेत्॥
स्वधर्म प्रच्युतान् राजा स्वे स्वे धर्मे नियोजयेत्॥

महर्षि याज्ञवल्क्येनापि स्वकीयं तात्पर्यमत्रैव रक्षितम्।
कुलानि जाती: श्रेणीश्च गणान् जानपदानपि।
स्वधर्मात् चलितान् राजा विनीयस्थापयेत् पथि॥

अन्यत्र ग्रन्थेष्वपि विवेचितस्यार्थस्य समर्थनं प्राप्यते। ततश्व निश्चीयते यत् प्रापणार्थकस्य नीतेः कर्त्ता राजा भवति इत्थञ्च सिद्धयति यत् राज्ञः इदं कर्त्तव्यमस्ति; अतः

नीतिपदं राजनीति राजधर्मपदेनाऽपि व्यवहृतं भवति। अत्र प्रसङ्गे धर्मशब्दः कर्त्तव्यवचनः। तथाहि- "धर्मशब्दस्य कर्त्तव्यतावाचनः" मेघातिथि। धर्मशब्दोऽत्र दृष्टादृष्टार्थानुष्ठेय परः।

नीति शब्द निर्वचनावसरेनुचित पदार्थस्यापि विवचनं कृतमिति जिज्ञासायामाह-अनुचित पदार्थस्तु शास्त्र निषिद्ध व्यवहार एव सिद्धयति। एतादृशस्यानौचित्यस्य पदार्थस्य निषेधाया राज्ञा-चतुर्णामुपायानामाश्रयणं कर्त्तव्यं भवति। तथाहि-

सामादीनामुपायानां चतुर्णामपि पण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥

याज्ञवल्क्योऽपि स्वकीयं तात्पर्यमत्रैव रक्षति। यथा-

उपायाः सामदानं च भेदो दण्डस्तथैव च।
सम्यक् प्रयुक्ता सिध्येयुर्दण्डस्त्वगतिका गतिः।

मत्स्यपुरणादीनामनुसारमेतदतिरिक्तमपि त्रयः उपायाः सन्ति। उपेक्षा, माया, इन्द्रजालदि भेदेन।

सामं भेदः तथा दानं दण्डश्च मनुजेश्वर।
उपेक्षा च तथा माया इन्द्रजाजं तथैव च॥

यद्यप्येते उपायाः शत्रुराजादीनां वशीकरणाय उपयोगिनः स्युरिति कथिताः सन्ति तथापि व्यवहार निर्वाहाय अमीषां चतुर्णां महत्त्वं न्यूनं नास्ति। उक्तं हि याज्ञवल्क्येन मिताक्षरायाम्-

एते सामादयो न केवलं राज्यव्यवहार विषयाः अपितु सकल व्यवहार विषयाः यथा अधीष्व पुस्तकमधीष्व दास्यामि तव मोदकम्। यद्वान्यस्मै प्रदास्यामि कर्णमुत्पाट्यमिते"।

एतेषूपायेषु सर्वे उपायाः न समेषां योग्या अपितु व्यवस्थानुसारमेव यज्योग्यः यो विद्यते। तदनुरुपमेव तदर्थमुपायः प्रयोज्यः। यदिकश्चन सज्जनः अज्ञानवशात् कुमार्गाधिरूढस्तर्हि साममात्रेणापि वशीकारोऽपेक्षितो भवति। एवमेव दाम, भेदादीनामपि यथावसरं प्रयोगः कर्त्तव्यः। तथाहि-

तत्राप्य तथ्यं साधूनामाक्रोशायैव जायते।
तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम॥

यः खलु आपत्ति पूर्वकमनुचितारम्भ सम्पृक्तोऽस्ति तमानेतुं न हि केवलं सामादि पर्याप्तमस्ति। किन्तु दण्डादिकमप्युपासनीयं भवति। उक्तं हि-

साम्ना यद्यपि रक्षांसि गृहणन्तीति पराश्रुतिः।
तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम्॥
यदि ते तु न तिष्ठेयुः उपायैः प्रथमैः त्रिभिः।
दण्डेनैव प्रसहयैतान् शनकैः वशमानयेत्॥
न शक्या ये वशे कर्त्तुं वशे कर्त्तुमुपाय त्रितयेन तु।
दण्डेन तान् वशीकुर्यात् दण्डो हि वश कृन्नृणाम्॥

इदन्तु ज्ञातव्यमस्ति यत् दण्ड प्रयोगे विवेकस्यादरः करणी भवति। अनुचितारम्भेण प्रजासु भयादिकं व्याप्तं भवति। सर्वथा तीक्ष्ण दण्डस्तु हेयः एव। स च दण्डः भूतानामुद्वेजनीयो भवति व्रतिनां वनवासिनाच्च हृदयमुनाञ्चजयति। किमुत् गृहस्थानाम् उक्तं हि-

दण्डो दमनादित्याहुः तेनादान्तान्दम येत्।
यस्माददन्तान्दमयप्य शिष्टान्दण्ड यत्यपि॥
दमनादण्डनाच्चैव तस्माद् दण्डं विदुर्बुधाः॥
यस्मादण्डो दमयति अदण्ड्यान् दण्डयत्यपि।

दमनाद् दण्डमनाच्चैव तस्माद‍ण्डं विदुर्बुधाः॥

तीक्ष्णदण्डो हि भूतानामुद्वेगः दुष्प्रणीतः कामक्रोधाभ्यामज्ञात् वानप्रस्थ परिव्राजकानपि कोपयति किमङ्ग पुनर्गृहस्थान्। अप्रणीतो हि मात्स्य न्यायमुद्भावयतिं वलीयानवलं हि ग्रसते दण्डधराभावे तेन गुप्तः प्रभवतीति।

समीक्ष्य सघृतः सम्यक् सर्वाः रंजयति प्रजाः।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः॥
त्रिवर्ग वर्धयत्याशु राज्ञो दण्डी यथाविधि।
प्रणीतो या स मनस्यात् वनस्थानानि कोपयेत्॥

सर्वत्र दण्ड प्रयोगो नैव कर्त्तव्यः उचितानुचितं वस्तुज्ञान समीक्ष्य दण्डस्य प्रयोगः विधातव्यः। शत्रुमित्रोदासीनाः अपराधानुसारं दण्ड भाजो भवन्ति। अतएव महाभारत मनुस्मृति प्रभृति ग्रन्थेषु प्रजामात्रं प्रति दण्डविधानं वर्णितमस्ति दण्डस्य क्षेत्रं महाकविना भारविनाऽपि साधु निदिष्टम्।

स्वप्रजानां न भेदेन नैव दण्डेन पालनम्।
कुर्वीत सामदानाभ्याम् सर्वदायत्नमास्थितः॥
स्वप्रजा दण्डभेदैश्च भवेद्राज्यविनाशनम।
स्वप्रजा दण्डनाच्छेयः कथं राज्ञो भविष्यति॥
दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभि रक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्म विदुर्बुधाः॥
वसूनि वांछन् न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्म विप्लवम्॥

कस्यापि स्मृत्यन्तरस्य प्रामाण्यमादाय विज्ञानेश्वरेण मातृ, पितृ, स्नातक, पुरोहित, परिव्राजक, वानप्रस्थाश्च अदण्ड्या इति स्वीकृतम्। तथाहि एतञ्च माता पित्रादि व्यतिरेकेण। तथा च स्मृत्यन्तरम् अदण्ड्यौ माता पितरौ स्नातक पुराहित परिव्राजक वानप्रस्थाः श्रुत शीलाचारविहीनः कोऽपि जनः दण्डनीयो भवतीति विज्ञायते। तथाहि-

पिताचार्यः सुह्न्माता भार्या पुत्रः पुराहितः।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति॥
ब्रह्मचारी गृहस्थश्व वानप्रस्थश्च भिक्षुकः।
दण्डस्यैव भयादेते मनुष्याः वर्त्मनि स्थिताः॥
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः।
उत्पथ प्रतिपन्नस्य कार्य भवति शासनम्॥
अपि भ्राता सुतोऽर्थ्यो वा श्वसुरो मातुलोऽपिवा।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति॥

एतेषु चतुर्षु सामदानादिषु मन्वनुसारं सामदण्डौ प्रधानौ वर्तते। उक्तं हि **-**

सामादीनामुपायानां चतुर्णामपिपण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥

कुल्लूक भट्टानुसारं सामदण्डावुभो प्रशस्तौ धनादिक्षय रहितत्त्वात्। तथाहि साम्नि प्रयास धन व्यय सैन्यप्रक्षयादि दोषाभावात् दण्डे तु ततं सद्भावेऽपि कार्य सिद्धयातिशयात्।

मनुना कुत्रचित् स्थले दण्डस्यैव प्रधान्यं स्वीकृतम्।
स राजा पुरुषो दण्डः स नेता शासिता च सः।
चतुर्णामाश्रमाणाञ्च धर्मस्य प्रतिभूः स्मृतः॥
सर्वो दण्डजितो लोकोदुर्लभो हि शुचिर्नरः॥
दण्डस्य हि भयात् हि भयात् सर्व जगद्भोगाय कल्पते॥

मत्स्यपुराणकारोऽपि दण्डस्य वैपरीत्ये स्वकीयं विचारं प्रस्तौति तन्मते दानस्यैव सर्वोत्कृष्टतमं स्थानं वर्तते। किन्तु तन्मतं मह्यं न रोचते यतो हि मम दृष्टौ राजनीत्या सम्बद्धे दाने उत्कोचस्यापि स्थानं विद्यते। दानमिदं यागादि गतं दानं नास्ति अयं तावत् प्रथमः कल्पः। द्वितीयः कल्पस्तु इदृशो विज्ञेयः यद्दानस्य क्षेत्रं सङ्कचितं भवति। विस्तृतमस्ति। अतएव स्वयं मत्स्यपुराणेनापि दण्डस्य क्षेत्रन्तु सत्स्वन्येष्वपायेषु दण्डस्यैव प्राशस्त्यं सूचितम्।

सर्वेषामप्युपायानां दानं श्रेष्ठतमं मतम्।

सुदत्तेनेह भवति दानेनोभय लोकजित्॥

अपि च

न शक्या ये वशीकर्त्तुम् उपायमत येन तु।
दण्डेन तान् वशीकुर्यात् दण्डो हि वशकृन्नृणाम्॥

इत्थञ्च महाभारतेऽपि दण्डस्यैव प्रचुरं महात्म्यं वर्णितमस्ति। एतावता सर्वेष्वुपायेषु दण्डस्यैव प्राधान्यं सिद्धयति। उपर्यक्त दण्ड प्राधान्य वर्णना दृष्ट्या नीति-शब्दो दण्डनीति शब्देनोच्यतें-दण्डेन नीतिरिति व्युत्पत्या दण्डनीति शब्दः तत्पर एव गृह्यते। नीति शब्दो दण्डनीति परकः उच्यते इत्थमाहि किमपि तच्चे तन्त्रेत्थम्। दण्डशब्द: उपायविशेषस्य वाचकोऽस्ति। तत्रैवोपायः सामान्यस्यापि। अतः नीतेः साधनं सामादयोऽपि शब्द शब्देन व्यवहीयन्ते। अथ च तेन साध्यानीति दण्डनीति: दण्डेन नीति: कथ्यन्ते। अथवा उपायोपेय नीत्योरभेदोपचारमादाय नीतिशब्दः दण्डनीति पदव्यपदेश्यो भवति।
तथाहि-

येन सन्दभ्यते जन्तुः उपायो दण्ड एव सः।

अथवा दण्डशब्दोऽत्र दमनमात्र वृत्तिः। स्वपरपक्षदमनोपाय शेष सामाद्युपग्राही द्रष्टव्यः। चतुर्थः कल्पस्तु इत्थं ज्ञेयः दण्डप्रयोजको राजाऽपि औपचारिक रूपेण दण्डपद वाच्यो भवति। अतः राज्ञः नीति दण्डनीतिरित्युच्यते। तथाहि-

दमो दण्ड इति ख्यातः तात्स्थाद् दण्डो महीपतिः।
तस्यनीतिर्दण्डनीति:।
दमो दण्ड इति ख्यातस्तस्माद् दण्डोमहीपतिः।
तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते॥
दण्डः संरक्षते धर्म तथैवार्थ जनाधिप।
कामं संरक्षते दण्डस्त्रिवर्गो दण्ड उच्यते॥

अत्र प्रसङ्गे इदमपि ज्ञातव्यमस्ति यत् केचन आचार्यानीतिशब्दस्यार्थः सन्मार्ग प्रापणं नैव कुर्वते, किन्तु दण्डप्रापणमस्ति इति मन्वते। अतः नीतिशब्दः दण्डनीतेरेव लुप्त पूर्वपदमस्तीति सिद्धयति। अत्र मते दण्डनीतिरित्यत्र षष्ठी तत्पुरुषः समासोः बोध्यः। सम्भवतः आचार्य कौटिल्यस्यापि मतं मत्वैव तात्पर्य रक्षतिं आन्वीक्षिकी त्रयी वार्तानां योगक्षेम साधनो दण्डः तस्य नीतिर्दण्डनीतिः। अलब्धलभार्था, लब्धपरिरक्षणी रक्षितविवर्धनी वृद्धस्य तीर्थेषु प्रतिपादनी च।

दण्डनीतिः स्वधर्मेभ्यश्चातुर्वर्ण नियच्छति।
प्रयुक्ता स्वामिना सम्यगधर्मेभ्यो नियच्छति॥

नात्र दण्डनीति शब्दः शास्त्रवाचको वर्तते। परन्तु दण्डः एकः उपायः वर्तते। अतः स च राज्ञः साक्षात् कर्तव्यं नास्ति। अपितु स्व-स्वधर्म प्रापणमेव कर्त्तव्यमस्ति। ततश्च दण्डनीति शब्दः सन्मार्ग प्रापणस्य पर्यायः कथमपि न भवितु मर्हतीति बोधयः। साध्य साधनयोरभेदोपचारमाश्रित्य दण्डनीतिपदं नीति पदवाच्यमपि भवतीति प्रकारान्तरमेतत्। उक्तं हि-

कुलानि जाति: श्रेणीश्च गणान् जानपदानपि।
स्वधर्मात् प्रच्युतान् राजा विनीय स्थापयेत्पथि॥
स च दण्डो द्विविधः शरीरार्थ दण्डश्चेति।
स्वेषु धर्मेष्ववस्थाप्य प्रजाः सर्वाः महीपतिः।
धर्मेण सर्वकृत्यानि शमनिष्ठानि कारयेत्॥

अस्तु प्रकृत नीति शब्दस्य सन्मार्ग प्रापणस्योद्देश्यम् वर्तते अभ्युदय इति, किन्तु आत्माभ्युदयस्तावन्न भवति यावत् परस्यावसादो न भवति। अतः परविनाशपूर्वक आत्माभ्युदय एव नीति पदवाच्यो भवति उक्तं हि महाकविमाघेन-

आत्मोदयः परग्लानिः द्वयं नीतिरितीयती।
सदूरी कृत्य कृतिभिः वाचस्पत्यं प्रतायते॥
नृपस्य परमोधर्मः प्रजानां परिपालनम्।
दुष्ट निग्रहणं नित्यं न नीत्या ते विना ह्युभे॥

अतः सिद्धयति यत् दण्डेन दण्डनीत्वा वा नीतिः सन्मार्ग प्रापणं भवति। ततश्च तया नीत्याभ्युदयो भवति; अतः अभ्युदयो दण्डनीति पदेन व्यपदेष्टुं शक्यते। इत्थं च सन्मार्गावलम्बन द्वारैव आत्माभ्युदयः साधकस्य कस्यापि तत्त्वस्यौपचारिकतया दण्डनीतिः कथयितुं शक्यते। आत्माभ्युदयस्यापि द्वौ भेदौ विद्यते एकमैहिलौकिकम्, अपरञ्च पारलौकिकम्। ऐहिलौकिकाभ्युदयः पारलौकिकस्याभ्युदयस्य भूमिका विद्यते। अतएव समुचित रीति द्वारा ऐहलौकिकाभ्युदयस्य अर्थागमस्य च प्रयोजिकां वार्त्तामुपचारतः दण्डनीतिरन्तर्भावयति। अतएव याज्ञवल्क्येन पशुपाल्य वाणिज्यादिभ्योऽपि नीतिशब्दस्य प्रयोगः कृतः।

अलब्धमीहेद् धर्मेण लब्धं यत्नेनपालयेत्।
पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्॥
नीत्या वणिक् पथादि कया वृद्धिं न चेत्। वृद्धं च पात्रेषु त्रिविधेषु धर्मार्थकामयुक्तेषु निक्षिपेद्।

अर्थशास्त्रे दण्डनीति शब्दस्य चत्वारि प्रयोजनानि कथितानि सन्ति। अलब्धलाभः, लब्ध परिक्षणम्, रक्षित सम्बर्द्धनम्, सम्बर्द्धित धनस्य पात्रेष्वर्पणम्। उक्तं हि महाकवि कालिदासेन-

यस्मिन् महीं शासति वाजिनीनां
निद्रां विहारार्थ पथेगतानाम्।
वातोऽपि नासंशयदंशुकानि
को लम्बयोदाहरणाय हस्तम्॥

उपर्युक्त विवेचनानुसारं दण्डप्रापणम्, लब्धपरिक्षणञ्चेति फल द्वयमपि दण्डप्रापणस्यैव विद्यते। ऐहलौकिक पारलौकिक फलाभ्युदय कामनया उभावपि समर्थनीयौ भवतः। तथाहि-
अलब्ध लाभार्था लब्ध परिरक्षिणी रक्षित विवर्धनी वृद्धस्त तीर्थेषु प्रतिपादिनी च। तस्यामायता लोकयात्रा तस्माल्लोकया-त्रार्थी नित्यमुद्यत दण्डः स्यात्। न ह्येवं विधं वशोपनयनमस्ति भूतानां यथा दण्ड इत्त्याचार्याः।

**संदर्भ**


1. अध्यापनं ब्रह्मयशः। मनुस्मृतौ **3.70**
2. मुण्डक **1.2.11-12** छान्दोग्य **8.5.3**
3. सुसीमजातके धुसजातके चा
4. हेनसांगे वाटर्सकृते प्रथमे भागे पृ० **2221**
5. नंगलीसजातके कोसियजातके च ।
6. वाटर्स- हेनसांग द्वितीयभागस्य पृ० **1881**